श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १४

*कपिलोपाख्यानम्*

समनुस्मृततावकाङ्घ्रियुग्मः
  स मनुः पङ्कजसम्भवाङ्गजन्मा।
निजमन्तरमन्तरायहीनं
  चरितं ते कथयन् सुखं निनाय॥ १ ॥

समये खलु तत्र कर्दमाख्यो
  द्रुहिणच्छायभवस्तदीयवाचा।
धृतसर्गरसो निसर्गरम्यं
  भगवंस्त्वामयुतं समाः सिषेवे॥ २ ॥

गरुडोपरि काळमेघकम्रं
  विलसत्केळिसरोजपाणिपद्मम्।
हसितोल्लसिताननं विभो त्वं
  वपुराविष्कुरुषे स्म कर्दमाय॥ ३ ॥

स्तुवते पुळकावृताय तस्मै
  मनुपुत्रीं दयितां नवापि पुत्रीः।
कपिलं च सुतं स्वमेव पश्चात्
  स्वगतिं चाप्यनुगृह्य निर्गतोऽभूः॥ ४ ॥

समनुश्शतरूपया महिष्या
  गुणवत्या सुतया च देवहूत्या।
भवदीरितनारदोपदिष्टः
  समगात् कर्दममागतिप्रतीक्षम्॥ ५ ॥

मनुनोपहृतां च देवहूतिं
तरुणीरत्नमवाप्य कर्दमोऽसौ।
भवदर्चननिर्वृतोऽपि तस्यां
दृढशुश्रूषणया दधौ प्रसादम्॥ ६ ॥

स पुनस्त्वदुपासनप्रभावा-
द्दयिताकामकृते कृते विमाने।
वनिताकुलसङ्कुलो नवात्मा
व्यहरद्देवपथेषु देवहूत्या॥ ७ ॥

शतवर्षमथ व्यतीत्य सोऽयं
नव कन्याः समवाप्य धन्यरूपाः।
वनयानसमुद्यतोऽपि कान्ता-
हितकृत् त्वज्जननोत्सुको न्यवात्सीत्॥ ८ ॥

निजभर्तृगिरा भवन्निषेवा-
निरतायामथ देव देवहूत्याम्।
कपिलस्त्वमजायथा जनानां
प्रथयिष्यन् परमात्मतत्वविद्याम्॥ ९ ॥

वनमेयुषि कर्दम प्रसन्ने
मतसर्वस्वमुपादिशन् जनन्यैः।
कपिलात्मक वायुमन्दिरेश
त्वरितं तं परिपाहि मां गदौघात्॥ १० ॥

**********